# Session 2020-21

# प्रश्नपत्रम् रूप रेखा

## कक्षा – दशमी (SOS)

## विषय – संस्कृतम्

**समय : होरात्रयम्** **पूर्णांक : 100**

**खण्ड - क**

**अपठित – अवबोधनम्**

1. अधोलिखितम् अनुच्छेदं अधिकृत्य निर्देशित प्रश्नानाम् उत्तराणि दीयन्ताम्। 1×5=5

परेषाम् उपकारः परोपकारो वर्तते। अन्य प्राणिनां हिताय यत् किञ्चित् दीयते, तेषां सहायता वा क्रियते तत् सर्वं परोपकारपदेन व्यहृयते। शास्त्रेषु परोपकारस्य महत्त्वं सुतरां वर्णितम् अस्ति। परोपकारेण संसारस्य कल्याणं जायते। मानवानां शान्तिः सुखं च वर्धते। परोपकारः सर्वेषाम् उपदेशानां सारभूतः।

(1) एकपदेन उत्तरत–

(क) परेषाम् उपकारः कः वर्तते?

(ख) परोपकारस्य महत्त्वं कुत्र वर्णितमस्ति?

(2) पूर्णवाक्येन उत्तरत–

(क) परोपकारेण मानवानां किम् वर्धते?

(3) निर्देशानुसारम् उत्तरत–

(क) 'संसारस्य कल्याणं जायते' इत्यत्र क्रियापदं किम्?

(ख) 'शास्त्रेषु' इति पदस्य पदपरिचयं कुरुत।

2. अधोलिखितम् अनुच्छेद पठित्वा अनुच्छेदाधारित–प्रश्नानाम् उत्तराणि लिखित। 1+1+1+1+1+1+1+1=8

भगवान् श्रीकृष्णः वासुदेवस्य पुत्रः आसीत्। बाल्यावस्थायाम् एव आततायी कंसः तं हन्तुं ऐच्छत्। कंसेन अनेकविधं छलं कृतम्। परं कृष्णेन स्वविवेकेन



Downloaded from cclchapter.com

सर्वं निष्फलीकृतम्। कृष्णः कंसं हतवान्। कृष्णः कलावान्, राजनीतिज्ञः, चतुरः, सुन्दरश्च आसीत्। महाभारतयुद्धस्य तेन सञ्चालनं कृतम्। युद्धकाले सः अर्जुनाय गीतायाः उपदेशम् अयच्छत्। स एव उपदेशः अधुना 'गीता' इति नाम्ना ज्ञायते।

(1) एकपदेन उत्तरत-

(क) कृष्णः कस्य पुत्रः आसीत्?

(ख) भगवान् कृष्णः कं हतवान्

(2) पूर्णवाक्येन उत्तरत-

(क) महाभारतयुद्धस्य सञ्चालनं केन कृतम्?

(3) निर्देशानुसारम् उत्तरत-

(क) उपरोक्तं गद्यांश पठित्वा तृतीयांशतुल्यं सारं लिख्यताम्।

(ख) प्रदत्तगद्यांशस्य उचितं शीर्षकं लिखत।

## खण्ड-ख

## (रचनात्मकं कार्यम्)

3. प्रधानाचार्यं प्रति रुग्वणावकाशहेतुः लिखितं प्रार्थना-पत्रम् मञ्जूषातः पदानि विचित्य रिक्तस्थानानि पूरयन्तु।

| |
|---|
| सविनयम्, दत्त्वा, श्रीमन्तः, आगन्तुम्, आज्ञाकारी, ज्वरपीडितः, सधन्यवादः, विद्यालयः, दिनत्रयस्य, सेवायाम्। |

1. ................ 1½×10=5

2. ............. प्रधानाचार्यः महोदयः, राजकीय वरिष्ठ माध्यमिक 3. ........ ,

अ. ब. स.

मान्यः



Downloaded from cclchapter.com

4. .......... निवेदयामि यत् अहम् 5. .......... अस्मि। अस्मात् कारणात् अहं विद्यालयं 6. ......... न शक्नोमि। अतः कृपया मह्यम् 7. ........... अवकाशं 8. ............. उपर्कुवन्तु

9. ............. ।

भवतां 10. ......... शिष्यः,

क. ख. ग।

4. मञ्जूषामधिकृत्य अधोलिखित सम्वादं पूर्यन्ताम् –

| |
|---|
| करोति, वसति, वर्तते, गृहं, गोपालः, कस्य, पितुः, विद्यालयस्य, अध्यापकः, तव। |

1½×10=5

कृष्णः – एतत् (1) ......... गृहम अस्ति?

हरिः – एतत् नरेशस्य (2) ........... अस्ति।

कृष्णः – मोहनः कुत्र (3) .......... ?

हरिः – सः (4) .......... समीपे वसति।

कृष्णः – (5) ......... गृहं कुत्र अस्ति?

हरिः – मम गृहं तु उद्यानस्य समीपे (6) ......... ।

कृष्णः – तव (7) .......... नाम किम्?

हरिः – मम पितुः नाम (8) ........ अस्ति।

कृष्णः – सः किम् (9) .......... ।

हरिः – सः (10) .......... अस्ति।

5. अधोलिखितेषु विषयेषु एकं विषयमधिकृत्य संस्कृत भाषायां पञ्चवाक्यानि लिखत। 7×1=7

दीपावली

मम प्रियः अध्यापकः

हिमाचल प्रदेशः



Downloaded from cclchapter.com

## खण्ड - ग

### ( अनुप्रयुक्त व्याकरणम् )

6. निम्नलिखितेषु त्रयाणां पदानां सन्धिः / सन्धिच्छेदं वा क्रियताम्।

1×3=3

शिक्षार्थी, कोऽपि, जगदीशः,

एक+एकः, सत्+जनः, रामः+च।

7. अधोलिखितेषु वाक्येषु चतुर्णां पदानां समासमधिकृत्य समस्तपदं विग्रहपदं वा विधीयन्ताम्। 1×4=4

(क) रामः .................. कार्यं करोति। (यथाविधिम्)

(ख) जनाः ............. पूजयन्ति। (देशभक्तम्)

(ग) ................. आदेशं पालय। (पितरौ)

(घ) रामः .............. आसीत्। (त्रयाणां लोकानां पतिः)

(ङ) सभायाम् सर्वे ............. आसन्। (न पण्डिताः)

(च) ............. महेशः कथ्यते। (नीलः कण्ठः यस्य सः)

8. अधोलिखितेषु वाक्येषु पञ्चवाक्यानां प्रकृति-प्रत्ययं पृथक्-पृथक् सम्मेल्य वा लिखत। 1×5=5

(क) नमन्ति.............वृक्षाः। (फलिनः)

(ख) ........... गीतां गायति। (गायिका)

(ग) अस्माभिः शुद्धं जलं...........। (पातव्यम्)

(घ) परिश्रमस्य ........... सर्वे जानन्ति। (महत्त्वम्)

(ङ) बालकः ............. खादति। (क्रीड् + शतृ)

(च) ............. जनः यशः प्राप्नोति। (गुण + मतुप्)

(छ) नृपेण प्रजाः ................। (पाल् + अनीयर्)

(ज) रामः ............. विद्यालयं गच्छति। (पठ् + तुमुन्)



Downloaded from cclchapter.com

9. मञ्जूषातः अव्ययपदानि विचित्य रिक्तस्थानानि पूरयत – 1½×10=5

| श्वः, बहिः, यत्, तत्र, विना, सम्प्रति, मा, क्षिप्रम, एव, सह |
|---|

(1) नगरात् ............ एकः देवालयः अस्ति।

(2) .......... रविवासरः भविष्यति।

(3) अहं पुनः पुनः वदामि ......... मया तव अभ्यासपुस्तिकान दृष्टा।

(4) रात्रिः सञ्जाता ........... गमनं नोचितम्।

(5) चिन्ता न कार्या, बालकः पित्रा ......... बहिर्गाता।

(6) धनस्य वैभवस्य च गर्वं ........... कुरु।

(7) ज्ञानं ........ जीवनं व्यर्थम्।

(8) समयः अल्पः उत्तरं ........ लिख।

(9) यत्र नार्यस्तु पूज्यन्ते रमन्ते...........देवताः।

(10) सन्ताः सदा मधुरं..........वदन्ति।

10. अधोलिखितेषु वाक्येषु त्रीणि वाक्यानि अधिकृत्य वाच्य-परिवर्तन कुरूत।

1×3=3


(क) अहं पठामि। (ख) लता भोजनं पचति।

(ग) रामः अजां ग्रामं नयति। (घ) कन्याः हसन्ति।

(ङ) वत्सेन दुग्धं पीयते।

11. घटिका चित्रानुसारं समयं संस्कृत भाषायां लिखत। 1×4=4

(चत्वारि एव)





Downloaded from cclchapter.com

12. अधोलिखितेषु पदेषु त्रयाणां पदानां पदपरिचयः दीयन्ताम्।

रामस्य, लतया, मुनिः, पठिष्यति, हसामि, अभवत्।

1×3=3

13. निम्नवाक्येषु लिङ्गाधारित संख्यावाचकपदानि प्रयुज्यताम् (कानिचित् पञ्चवाक्यानि एव) 1×5=5

(क) वेदाः .................... सन्ति। (चत्वारः / चत्वारि / चतस्रः)

(ख) त्वम् .................. छात्रान् पाठयसि। (पञ्चान् / पञ्चाः / पञ्च)

(ग) अहं ............. वृक्षौ पश्यामि। (द्वे / द्वौ / द्वि)

(घ) मम हस्ते ........... पुष्पम् अस्ति। (एकम् / एका / एकः)

(ङ) शिवस्य ........... नेत्राणि सन्ति। (त्रयः / तिस्रः / त्रीणि)

(च) मम विद्यालये ..... अध्यापिकाः सन्ति। (चत्वारः / चतस्रः / चत्वारि)

(छ) एषः ............ गजः अस्ति। (एका / एकम् / एकः)

(ज) तस्य ........... कन्ये स्तः। (द्वे / द्वौ / द्वि)

14. निम्नवाक्येषु पञ्चवाक्यानि संशोधयत्। 1×5=5

(क) देवं नमः।

(ख) लता गीतं गायन्ति।

(ग) त्वं कुत्र गच्छति।

(घ) अलं श्रमात्।

(ङ) रामः पठिष्यसि।

(च) रामस्य सह सीता वनं गता।

(छ) वयं नमामि।

(ज) तौ धावथः।

**खण्ड - घ**

**( पठित् - अवबोधनम् )**

15. अधोलिखित गद्यांश पठित्वा यथानिर्देशं प्रश्नान् उत्तरत-



Downloaded from cclchapter.com

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्। 1×5=5

(1) एकपदेन उत्तरत–

(क) निर्धनो जनः भूरि परिश्रम्य किम् उपार्जितवान्?

(ख) निर्धनो जनः स्वपुत्रं कुत्र प्रवेशं दापयितुं सफलो जातः?

(2) पूर्णवाक्येन उत्तरत–

(क) पिता कस्य रुग्णतामाकर्ण्य व्याकुलः जातः?

(3) निर्देशानुसारम् उत्तरत–

(क) 'धनम्' इति पदस्य समानार्थकपदं गद्यांशात् चित्त्वा लिखत।

(ख) 'परिश्रम्य' इत्यस्य पदस्य प्रकृति-प्रत्ययं पृथक्-पृथक् कुरुत।

(अ) अधोलिखितं पद्यांशं पठित्वा यथानिर्देशं प्रश्नान् उत्तरत– 1×5=5

उदीरितोऽर्थः पशुनाऽपि गृह्यते,
हयाश्च नागाश्च वहन्ति बोधिताः।
अनुक्तमप्यूहति पण्डितो जनः,
परेङ्गितज्ञानफला हि बुद्धयः।।

(1) एक पदेन उत्तरत–

(क) केन उदीरितोऽर्थः गृह्यते?

(ख) काः परेङ्गितज्ञानफलाः भवन्ति?

(2) पूर्णवाक्येन उत्तरत–

(क) पण्डितः जनः किम् ऊहति?

(3) निर्देशानुसारम् उत्तरत–

(क) 'पण्डितो जनः' इत्यत्र विशेष्यपदं किम्?

(ख) 'उक्तम्' इति पदस्य अत्र विलोमपदं किम्?



Downloaded from cclchapter.com

(इ) अधोलिखितं नाट्यांश पठित्वा यथानिर्देशं प्रश्नान् उत्तरत- 1×5=5

व्याघ्रः - गच्छ, गच्छ जम्बुक! त्वमपि किञ्चिद् गूढप्रदेशम्। यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्धः परन्तु गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः।

शृगालः - व्याघ्र ! त्वया महत्कौतुकम् आवेदितम् यत् मानुषादपि विभेषि?

व्याघ्रः - प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा।

जम्बुकः - स्वामिन ! यत्रास्ते सा धूर्ता तत्र गम्यताम्। व्याघ्र। तव पुनः तत्र गतस्य सा सम्मुखमपीक्षते यदि, तर्हि त्वया अहं हन्तव्यः इति।

व्याघ्रः - शृगाल ! यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात्।

(1) एकपदेन उत्तरत-

(क) व्याघ्रः कस्मात् अपि विभेति?

(ख) व्याघ्रमारी सात्मपुत्रौ कया प्रहरन्ती दृष्टा?

(2) पूर्णवाक्येन उत्तरत-

(क) यदि शृगालः व्याघ्रं मुक्त्वा याति तदा किं स्यात्?

(3) निर्देशानुसारम् उत्तरत-

(क) 'शृगालः' इत्यस्य कः पर्यायः अत्र प्रयुक्तः?

(ख) 'हन्तव्यः' अत्र प्रकृति - प्रत्ययौ निर्दिशत ?

16. (अ) अधोलिखित - गद्यांशयोः कस्यचिद् एकस्य गद्यांशस्य हिन्दी-भाषायाम् अनुवादं लिखत। 1×3=3

(क) न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् स शवः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान्-मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि 'त्वयाडहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः, अतः निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे' इति।

(ख) कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः



Downloaded from cclchapter.com

बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीबलः तमुत्थापयितुं बहुवारं यत्नमकरोत् तथापि वृषः नोत्थितः।

(ग) अधोलिखित - पद्यांशयोः कस्यचिद् एकस्य पद्यांशस्य हिन्दी-भाषायाम् अनुवादं लिखत। 1×3=3

(क) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

(ख) बयोबल शरीराणि देशकालाशनानि च।
समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात्।।

17. अधोलिखितवाक्येषु चतुर्णां वाक्यानां रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत। 1×4=4

(क) तत्र राजसिंहो नाम राजपुत्रः वसति स्म।

(ख) बुद्धिमती चपेटया पुत्रौ प्रहृतवती।

(ग) व्याघ्रं दृष्ट्वा धूर्तः श्रृगालः अवदत्।

(घ) पुरा त्वया मह्यम् व्याघ्रत्रयं दत्तम्।

(ङ) शरीरस्य आयासजननं कर्म व्यायामः इति कथ्यते।

(च) अरयः व्यायामिनम् न अर्दयन्ति।

18. (अ) कानिचित् चत्वारि समानार्थकपदानि योजयत - ½×4=2

| | |
|---|---|
| प्रभूतम् | चेतः |
| श्रेयः | परिषद् |
| चित्तम् | नेत्रम् |
| सभा | आननम् |
| चक्षुष् | विपुलम् |
| मुखम् | कल्याणम् |



Downloaded from cclchapter.com

(आ) कानिचित् चत्वारि विलोमपदानि योजयत –  ½×4=2

| | |
|---|---|
| प्रसीदति | उदये |
| मूर्खः | दुर्लभः |
| सुलभः | निरर्थकम् |
| सम्पत्तौ | अवसीदति |
| अस्ते | पण्डितः |
| सार्थकम् | विपत्तौ |

19. कानिचित् चत्वारि विशेषणविशेष्यपदानि योजयत  1×4=4

| | |
|---|---|
| दुर्बलम् | कृपा |
| क्रुद्धः | वृषभम् |
| सहस्राधिकेषु | कृषीबलः |
| अभ्यधिका | आखण्डलः |
| विस्मितः | जननी |
| तुल्यवत्सला | पुत्रेषु |



Downloaded from cclchapter.com

| क्रम. स. | पाठ संख्या | हटाये गये अध्याय / पाठ का नाम | पृष्ठ सं. |
| --- | --- | --- | --- |
| | | कक्षा-9वीं<br>पुस्तक का नाम : शेमुशी भाग-1 | |
| 1. | अध्याय 7 | प्रत्यभिज्ञान | 45 से 55 तक |
| 2. | अध्याय 10 | जटायोः शैर्यम्। | 71 से 77 तक |
| 3. | अध्याय 12 | वाङ्मनः प्राणस्वरूपम्। | 85 से 90 तक |
| | | कक्षा - दसवीं<br>पुस्तक का नामः शेमुशी भाग-2 | |
| 1. | अध्याय 10 | भूकम्पविभीषिका। | 82 से 89 तक |
| 2. | अध्याय 11 | प्राणेभ्योऽपि प्रियः सुहृद। | 90 से 98 तक |
| 3. | अध्याय 12 | अन्योत्त्क्यः। | 99 से 106 तक |

विशेष-कक्षा नवीं के प्रश्न-पत्र का अंक विभाजन पिछले सत्र की भान्ति ही है। प्रश्नों के अंक विभाजन में कोई परिवर्तन नहीं किया गया है।



Downloaded from cclchapter.com